नाम्ना ख्याता। तत्पिता शूरसेनः तां राज्ञे कुन्तिभोजाय दत्तवान्। इयं हि कन्यावस्थायां मुनिदत्तविद्यापरीक्षार्थं मन्त्रबलाहूतात् सूर्य्यात् कर्णं प्रासोष्ट। विवाहात् परञ्च सा मृगीभूतस्य मुनेः शापात् स्त्रीसङ्गमवर्जितस्य स्वामिनो महाराजपाण्डोराज्ञया धर्म्मादयुधिष्ठिरं पवनाद्भीमं इन्द्रादर्ज्जुनं सुषुवे। इति महाभारते १।१११ अध्यायः॥ इयञ्च परमसाध्वीतया भगवद्वादरायणादिमहर्षिगणवरप्रभावेण प्रातःस्मरणीया रमणी। यदुक्तम्,—

"अहल्या द्रौपदी कुन्ती तारा मन्दोदरी तथा।
पञ्चकन्याः स्मरेन्नित्यं महापातकनाशनम्"॥)

गुग्गुलुवृक्षः। शल्लकी। इति विश्वमेदिन्यौ॥ ब्राह्मणी। इति जटाधरः॥

कुन्थ ग क्लिषि। क्लिशि। इति कविकल्पद्रुमः॥ (क्र्यां-परं-सकं-अकं च-सेट्।) पञ्चमस्वरी। क्लिशि दुःखानुभवे। ग कुथ्नाति बुभुक्षार्त्तः। इति हलायुधः। शुकुन्थ। इति दुर्गादासः॥

कुन्थुः, पुं, (कुथ्नाति दुःखसहनक्षमो भवति। कुन्थ+उन्।) बौद्धविशेषः। जिनचक्रवर्त्तिविशेषः। इति हेमचन्द्रः॥

कुन्दः, पुं क्ली, (कु कुत्सितं दुर्गन्धादिजनितक्लेशं द्यति नाशयति। कु+दो छेदने+कः। पृषोदरात् नुम्। यद्वा कौतीति। "कुन्दादयश्च"। उणां ४। ९८। इति निपातनात् सिद्धम्।) पुष्पवृक्षविशेषः। कुंदफुलेर गाछ इति भाषा। तत्पर्य्यायः। माघ्यम् २। इत्यमरः।२।४।७३॥ शुक्लपुष्पः ३। इति रत्नमाला॥ मकरन्दः ४ महामोदः ५ मनोहरः ६ मुक्तापुष्पः ७ सदापुष्पः ८ तारपुष्पः ९ अट्टहासकः १० दमनः ११ वनहासः १२ मनोज्ञः १३ वोरटम् १४ वरटम् १५। इति शब्दरत्नावली॥ (यथा, नवग्रहस्तोत्रे शुक्रस्तुतिः।

"ॐ हिमकुन्दमृणालाभं दैत्यानां परमं गुरुम्।
सर्व्वशास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहम्"॥)

अपि च। भावप्रकाशे।

"कुन्दन्तु कथितं माघ्यं सदापुष्पञ्च तत् स्मृतम्।
कुन्दं शीतं लघु श्लेष्मशिरोविषविपित्तहृत्"॥

अस्य गुणाः। अतिमधुरत्वम्। शीतलत्वम्। कषायत्वम्। कैश्यमावनत्वम्। कफपित्तहरत्वम्। सारकत्वम्। दीपनत्वम्। पाचनत्वञ्च। इति राजनिर्घण्टः॥ तत्पुष्पगुणौ। श्लेष्मकारित्वम्। ग्राहित्वञ्च। इति राजवल्लभः॥

कुन्दः, पुं, कुन्दुरुनामगन्धद्रव्यम्। (अस्य पर्य्याया यथा।
"कुन्दुरुस्तु मुकुन्दः स्यात् सुगन्धः कुन्द इत्यपि"।
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) भ्रमियन्त्रम्। कुँद इति भाषा। कुवेरस्य निधिविशेषः। इति मेदिनी॥ करवीरवृक्षः। इति राजनिर्घण्टः॥ (कुन्दपुष्पवर्ण इव श्वेततया सत्ययुगे हंसावतारत्वात्। विष्णुः। यथा महाभारते १३।१४९।१००।

"कुमुदः कुन्दरः कुन्दः पर्ज्जन्यः पवनोऽनिलः"॥

यद्वा कुं पृथ्वीं काश्यपाय दत्तवान्। दा+कः। द्वितीयाया अलुक्। परशुरामावतारे क्षत्रियहत्यापापशुद्ध्यर्थं मारीचाय अश्वमेधयज्ञे महादानस्य दक्षिणास्वरूपवसुन्धरादानादस्य तथात्वम्। तत्कथा यथा हरिवंशे।

"सर्व्वपापविशुद्ध्यर्थं वाजिमेधेन चेष्टवान्।
तस्मिन् यज्ञे महादाने दक्षिणां भृगुनन्दनः।
मारीचाय ददौ प्रीतः काश्यपाय वसुन्धराम्"॥)

कुन्दकः, पुं, (कुन्द+संज्ञायां कन्।) कुन्दुरुकः। इति राजनिर्घण्टः॥

कुन्दमः, पुं, (अनिष्टकारित्वात् कुत्सितं उन्दुरादिकं दमयति नाशयतीति। दम+णिच्+अच् पृषोदरात् मुम् साधुः। यद्वा कुन्देन मीयते प्रायेण शुभ्रवर्णत्वात्। कुन्द+मा+घञर्थे कः।) विड़ालः। इति त्रिकाण्डशेषः॥

कुन्दरः, पुं, (कुं भूमिं दारयति। अन्तर्भूतणिजर्थे दॄ+अच् पृषोदरात् मुम् साधुः।) तृणभेदः। कुन्दरा इति कलिङ्गे ख्यातः। तत्पर्य्यायः। कण्डुरः २ भिराटी ३ दीर्घपत्रः ४ खरच्छदः ५ रसालः ६ क्षेत्रसम्भूतः ७ सुदलः ८ मृगवल्लभः ९। अस्य मूलगुणाः। गौल्यत्वम्। शीतलत्वम्। पित्तातिसारनाशित्वम्। गोधनानां प्रशस्तत्वम्। बलपुष्टिविवर्द्धनत्वञ्च। इति राजनिर्घण्टः॥ (कुन्दवत् निर्म्मलानि धर्म्मानुबन्धीनि फलानि राति ददाति। कुन्द+रा+कः। यद्वा कुं पृथ्वीं, हिरण्याक्षदैत्यं हन्तुकामो भगवान् विष्णुः वराहरूपेण दारयति। दॄ+णिच्+अच् पृषोदरात् मुम् साधुः। विष्णुः। यथा महाभारते १३।१४९।१००।

"कुमुदः कुन्दरः कुन्दः पर्ज्जन्यः पवनोऽनिलः"॥)

कुन्दिनी, स्त्री, (कुन्दानां पद्मानां समूहः। खलादित्वात् इनिः। स्त्रियां ङीप्।) पद्मिनी। पद्मसमूहः। इति त्रिकाण्डशेषः॥

कुन्दुः, स्त्री, (कुं भूमिं दृणातीति। कु+दॄ+बाहुलकात् डुः।) कुन्दुरुनामगन्धद्रव्यम्। इति शब्दमाला अमरटीका च॥ (कुन्दुरुशब्देऽस्या विवरणं ज्ञातव्यम्॥) मूषिके पुं। इतिशब्दरत्नावली॥

कुन्दुरः, पुं, (कुं भूमिं दारयति। दॄ विदारे+उरन्।) कुन्दुरुनामगन्धद्रव्यम्। इत्यमरटीकायां भरतः॥

कुन्दुरुः, पुं, स्त्री, (कुं भूमिं उनत्ति। उन्द्+मृग्वादित्वात् निपातनात् साधुः।) स्वनामख्यातसुगन्धिद्रव्यम्। यस्य निर्य्यासे कुन्दुरुखोटि इति ख्यातिः। तत्पर्य्यायः। पालङ्क्या २ मुकुन्दः ३ कुन्दः ४। इत्यमरः।२।४।१२१॥ पालङ्की ५ मुकुन्दुः ६ कुन्दुः ७ कुन्दुरः ८। इति तट्टीकायां भरतः॥ कुन्दुरुकः ९ सौराष्ट्रः १० शिखरी ११ कुन्दकः १२ तीक्ष्णः १३ गोपुरकः १४ बहुगन्धः १५ पालिन्दः १६ भीषणः १७ तीक्ष्णगन्धः १८ बली १९। इति जटाधरः॥ अपि च।

"कुन्दुरुस्तु मुकुन्दः स्यात् सुगन्धः कुन्द इत्यपि।
कुन्दुरुर्म्मधुरस्तिक्तस्तीक्ष्णस्त्वच्यः कटुर्हरेत्।
ज्वरस्वेदग्रहालक्ष्मीमुखरोगकफानिलान्"॥

इति भावप्रकाशः॥ अस्य गुणाः। मधुरत्वम्। तिक्तत्वम्। कफपित्तार्त्तिदाहनाशित्वञ्च। अस्य पानलेपनयोर्गुणाः। शिशिरत्वम्। प्रदरामयशान्तिकारित्वञ्च। इति राजनिर्घण्टः॥ अलक्ष्मीरक्षोज्वरनाशित्वम्। इति राजवल्लभः॥ (अस्य व्यवहारो यथा वैद्यकचक्रपाणिसंग्रहे ऽष्टादशशतिकप्रसारणी तैले॥

"कर्पूरं कुन्दुरुनिशाणवकृष्णामचन्दनम्"॥ * ॥)

कुन्दुरुकः, पुं, स्त्री, (कुन्दुरु+स्वार्थे कन्।) कुन्दुरुनाम सुगन्धिद्रव्यम्। इति राजनिर्घण्टः॥

कुन्दुरुकी, स्त्री, (कुन्दुरुक+जातित्वात् ङीष्।) शल्लकीवृक्षः। इत्यमरः।२।४।१२४॥

कुप इ कि द्युतौ। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्-इदित्।) पञ्चमस्वरी। इ कुम्प्यते। कि कुम्पयति कुम्पति। द्युतिराच्छादनम्। इति दुर्गादासः॥

कुप, क द्युतौ। इति कविकल्पद्रुमः॥ (चुरां-परं-अकं-सेट्।) क कोपयति। इति दुर्गादासः॥

कुप य इर् कोपे। इति कविकल्पद्रुमः॥ (दिवां-परं-अकं-सेट्-इरित्।) कोपो नेत्ररौहित्यादिहेतुश्चित्तविकारः। य, कुप्यति माता शिशवे। इर अकुपत् अकोपीत्। अस्मात् पुषादित्वान्नित्यं ङ इत्यन्ये। "कदाचित् कुप्यते माता नोदरस्था हरीतकी"। इति तु कुप्यतीति कुप् ततः स इवाचरति इति ङे साध्यम्। इति दुर्गादासः॥

कुपथः, पुं, कुत्सितः पन्थाः। (पाणिनिमते कापथ इति नित्यं स्यात्। वोपदेवमते तु "पथि पुरुषे वा"। इति सूत्रेण विभाषया कोः कादेशः।) कापथः। इति शब्दरत्नावली। (यथा, श्रीमद्भागवते ५।६।१०। "स्वधर्म्मपथमकुतोभयमपहाय कुपथपाषण्डमसमञ्जसं निजमनीषया मन्दः प्रवर्त्तयिष्यति"॥ कुपथः सेव्यतेऽनेनास्य। अर्श आदित्वात् अच्। कुपथगामिनि, त्रि। यथा महाभारते।१।६७।२९।

"कुपथस्तु महावीर्य्यः श्रीमान् राजन्! महासुरः।
सुपार्श्व इति विख्यातः क्षितौ जज्ञे महीपतिः"॥)

कुपाणिः, त्रि, (कुत्सितः पाणिर्यस्य।) वक्रहस्तः। इति जटाधरः। कोपा इति भाषा॥

कुपिनी, [न्] पुं, (कुपिनी मत्स्यधानी अस्यास्तीति। व्रीह्यादित्वात् इनिः।) कैवर्त्तः। इति त्रिकाण्डशेषः। जालिया इति भाषा॥

कुपिनी, स्त्री, (कुम्प्यते रक्ष्यते मत्स्योऽत्र। कुप इ कि द्युतौ अधिकरणे बाहुलकात् इनिः। ततो ङीप् पृषोदरादित्वात् साधुः।) स्वल्पमत्स्यधानी। इति शब्दरत्नावली। खालुइ इति भाषा॥

कुपिन्दः, पुं, (कुम्पयति विस्तारयति सूत्राणि। कुप इ कि द्युतौ+"कुपेर्वा वश्च"। उणां ४। ८६। इति किन्दच्।) तन्तुवायः। इत्युणादिकोषः॥

कुपीलुः, पुं, (कुत्सितः पीलुः।) कारस्करवृक्षः तिन्दुकविशेषः। मकुरतेन्दु माकड़ाकेंदु इति च भाषा। तत्पर्य्यायः। जलजः २ दीर्घपत्रकः ३ कुलकः